# Shri Matangi Kavacha

# શ્રીમાતઙ્ગી કવચમ્

## Document Information

Text title : Matangi Kavacham 2

File name : mAtangIkavacha.itx

Category : devii, dashamahAvidyA, devI, kavacha

Location : doc_devii

Transliterated by : Lalitha Parameswari parameswari.lalitha at gmail.com

Proofread by : Lalitha Parameswari, NA

Latest update : August 27, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીમાતઙ્ગી કવચમ્

અસ્ય શ્રીમાતઙ્ગીકવચમન્ત્રસ્ય મહાયોગીશ્વરઋષિઃ
અનુષ્ટુપ્ છન્દઃ શ્રીરાજમાતઙ્ગીશ્વરી
શ્રીમનઙ્ગીપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

નીલોત્પલપ્રતીકાશામઞ્જનાદ્રિસમપ્રભામ્ ।
વીણાહસ્તાં ગાનરતાં મધુપાત્રં ચ બિભ્રતીમ્ ॥ ૧॥

સર્વાલઙ્કારસંયુક્તાં શ્યામલાં મદશાલિનીમ્ ।
નમામિ રાજમાતઙ્ગીં ભક્તાનામિષ્ટદાયિનીમ્ ॥ ૨॥

એવં ધ્યાત્વા જપેન્નિત્યં કવચં સર્વકામદમ્ ।
શિખાં મે શ્યામલા પાતુ માતઙ્ગી મે શિરોઽવતુ ॥ ૩॥

લલાટં પાતુ ચણ્ડાલી ભ્રુવૌ મે મદશાલિની । var ચણ્ડેશી
કર્ણૌ મે પાતુ માતઙ્ગી શઙ્ખૌ કુણ્ડલશોભિતા ॥ ૪॥

નેત્રે મે પાતુ રક્તાક્ષી નાસિકાં પાતુ મે શિવા ।
ગણ્ડૌ મે પાતુ દેવેશી ઓષ્ઠૌ બિમ્બફલાધરા ॥ ૫॥

જિહ્વાં મે પાતુ વાગીશી દન્તાન્ કલ્યાણકારિણી ।
પાતુ મે રાજમાતઙ્ગી વદનં સર્વસિદ્ધિદા ॥ ૬॥

કણ્ઠં મે પાતુ હૃદ્યાઙ્ગી વીણાહસ્તા કરૌ મમ ।
હૃદયં પાતુ મે લક્ષ્મીર્નાભિં મે વિશવનાયિકા ॥ ૭॥

મમ પાર્શ્વદ્વયં પાતુ સૂક્ષ્મમધ્યા મહેશ્વરી ।
શુકશ્યામા કટિં પાતુ ગુહ્યં મે લોકમોહિની ॥ ૮॥

ઊરૂ મે પાતુ ભદ્રાઙ્ગી જાનુની પાતુ શાઙ્કરી ।
જઙ્ઘાદ્વયં મે લોકેશી પાદૌ મે પરમેશ્વરી ॥ ૯॥

પ્રાગાદિદિક્ષુ માં પાતુ સર્વૈશ્વર્યપ્રદાયિની ।

રોમાણિ પાતુ મે કૃષ્ણા ભાર્યાં મે ભવવલ્લભા ॥ ૧૦॥

શઙ્કરી સર્વતઃ પાતુ મમ સર્વવશઙ્કરી ।
મહાલક્ષ્મીર્મમ ધનં વિશ્વમાતા સુતાન્ મમ ॥ ૧૧॥

શ્રીમાતઙ્ગીશ્વરી નિત્યં માં પાતુ જગદીશ્વરી ।
માતઙ્ગી કવચં નિત્યં ય એતત્પ્રપઠેન્નરઃ ॥ ૧૨॥

સુખિત્વં સકલાન્ લોકાન્ દાસીભૂતાન્કરોત્યસૌ ।
પ્રાપ્નોતિ મહતીં કાન્તિં ભવેત્કામ શતપ્રભઃ ॥ ૧૩॥

લભતે મહતીં લક્ષ્મીં ત્રૈલોક્યે ચાપિ દુર્લભામ્ ।
અણિમાદ્યષ્ટસિદ્ધં યં સઞ્ચરત્યેષ માનવઃ ॥ ૧૪॥

સર્વવિદ્યાનિધિરયં ભવેદ્વાગીશ્વરેશ્વરઃ ।
બ્રહ્મરાક્ષસવેતાલભૂતપ્રેત પિશાચકૈઃ ॥ ૧૫॥

જ્વલન્વહ્નિરિવ શસ્યૈર્વેશ્યતે ભૂતપૂર્વકૈઃ ।
પરમં યોગમાપ્નોતિ દિવ્યજ્ઞાનં સમશ્નુતે ॥ ૧૬॥

પુત્રાન્ પૌત્રાનવાપ્નોતિ શ્રીર્વિદ્યાકાન્તિ સંયુતાન્ ।
તદ્ભાર્યા દુર્ભગા ચાપિ કાન્ત્યા રતિસમાભવેત્ ॥ ૧૭॥

સર્વાન્ કામાનવાપ્નોતિ મહાભોગાંશ્ચ દુર્લભાન્ । મહાભોગાન્ સુદુર્લભાન્
ભુક્તિમન્તે સમાપ્નોતિ સાક્ષાત્પરશિવો ભવેત્ ॥ ૧૮॥

ઇતિ શ્રી મહાઽઽગમરહસ્યે દત્તાત્રેય વામદેવ સંવાદે
સપ્તમપરિચ્છેદે શ્રીમાતઙ્ગી કવચં સમ્પૂર્ણમ્ ।

Encoded and proofread by Lalitha Parameswari parameswari.lalitha at gmail.com, NA

*Shri Matangi Kavacha*
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*